II Sem Regular Exam April, 18
03974
Library

FYBA
19/4/18
2 to 5
pages-3.

Sans I

**Q.P. Code :03974**

(30)

**[Time: - 3 Hours]** **[ Marks: 100]**

Please check whether you have got the right question paper.

N.B:
1. All Questions are compulsory.
2. All Questions carry equal marks.
3. Figures to the right indicate marks to a subquestions.

१. केवलं **व्दौ समूहौ** अनुवदत। १०

A. (i) यथेदं व्रतमारब्धं नलस्याराधने मया।
तेन सत्येन में देवास्तमेव प्रदिशन्तु मे।।
स्वं चैव रूपं कुर्वन्तु लोकपाला महेश्वराः।
यथाहमभिजानीयाँ पुण्यश्लोकं नराधिपम्।

(ii) वज्रलेपोऽयमाख्यातश्चित्रे सर्वत्र शस्यते।
तं कृत्वा मृत्तिकापात्रे तोयं क्षिप्त्वा प्रतापयेत्।।
सन्तप्तो द्रवतां याति सर्ववर्णेषु तद्द्रवः।
मिश्रणीयः प्रमाणेन यथा वर्णो न नश्यति।।

B. (i) लेखनी नाम सा प्रोक्ता सा चैव त्रिविधा भवेत्। १०
स्थूला मध्या तथा सूक्ष्मा तया चित्रं विरच्यते।।
स्थूलया लेपनं कार्यं तिर्यगाहितया तया।
अङ्गनं मध्यया कुर्यादग्रपार्श्वनिविष्टया।।

(ii) विनोदः – कुतो विषं प्राप्तव्यम्।
प्रकाशः तदहं दास्यामि।
विनोदः – परम् अधुना सर्वेष्वपि वस्तुषु मिश्रणं भवति। तत्कुतः शुध्दविषप्राप्तिः संभवति।
प्रकाशः– तदपि सत्यम्। तर्हि अस्मिन् समुद्रे अवगाहनं कुरु।
विनोदः– थूः। थूः। अरे सागरजलं अतीव क्षारयुक्तं भवति। अपरं च नाहं जलतरणं जानामि।

C. (i) श्रितकमलाकुचमण्डल धृतकुण्डल ए। १०
कलितललितवनमाल जय जयदेव हरे।।
दिनमणिमण्डलमण्डन भवखण्डन ए।
मुनिजनमानसहंस जय जयदेव हरे।।

(ii) प्रभुः– (सहर्षम्) कथम्। अन्त्येष्टिः। (सविषादम्) हन्त। भवान् तु जीवति। नाहं सजीवानां अन्त्येष्टिं करोमि। भोः सांप्रतं दुर्लभः खलु एष मृत्युः। अधुना वैद्यकशास्त्रस्य उत्कर्षेण न कोऽपि म्रियते। अन्यच्च, प्रायः जनाः भडाग्निमेन यच्छन्ति, न मंत्राग्निम्। अतः ग्राहकाभावात् –
विनोदः– किं ग्राहकाभावात्।
प्रभुः– आम्। प्रेतानाम्अभावात् अहमेव म्रिये।

**TURN OVER**

II Sem Regular Exam April, 18
03974
Library



२. केवल **द्वौ परिच्छेदौ** लिखत।

A. दमयन्त्याः वर्णनम्। १०

B. प्राणस्य श्रेष्ठत्वम्। १०

C. सोमेश्वरः। १०

३. केवल **व्दौ** उत्तरत। १०

A. ससन्दर्भं स्पष्टीकुरुत।

(i) विविशुस्ते नृपा रङ्गं महासिंहा इवाचलम्।

(ii) हेम्नः संलक्ष्यते ह्यग्नौ विशुध्दिः श्यामिकाऽपि वा।

B. ससन्दर्भं स्पष्टीकुरुत। १०

(i) यस्मिन् व उत्क्रान्ते इदं शरीरं पापीयं मन्यते स वो वसिष्ठ इति।

(ii) कालियविषधरगञ्जन जनरञ्जन ए।
यदुकुलनलिनदिनेश जय जयदेव हरे।

C. भक्तिकाव्यस्य स्वरुपं स्पष्टीकुरुत। १०

४. केवल **व्दौ** उत्तरत। १०

A. 1) सन्धिविग्रहं कुरुत।

(i) हयग्नौ।

(ii) तानीह

(iii) वागुवाच।

(iv) वज्रलेपोऽयम्

(v) मृत्युस्तु

2) रुपपरिचयं कुरुत।

(i) आगत्य

(ii) मनसा

(iii) जग्मुः

(iv) रूपेषु

(v) प्राणैः

B. श्लोकपूर्तिं कुरुत। १०

(i) _______ कवियशःप्रार्थी _______ उपहास्यताम्।
_______ फले लोभादुद्बाहुरिव वामनः।।
अथवा _______ वंशेऽस्मिन्पूर्वसूरिभिः।
मणौ _______ सूत्रस्येवास्ति मे गतिः।।



EB0C22D99B59C9B1CEE0466F01BD6E08

(ii) ________ जितदूषण ए।
________ जय जयदेव हरे।।
अभिवन ________ ________ ए।
श्रीमुख ________ जय जयदेव हरे।।

C. **संस्कृतेन** उत्तरत।
(i) रघुवंशस्य नृपाः वार्धके कथं तनु त्यजन्ति ?
(ii) दमयन्त्याः पितुः नाम किम् ?
(iii) 'प्राणसंवादः' कस्याम् उपनिषदि वर्तते ?
(iv) गीतगोविन्दस्य कर्ता कः ?
(v) प्रकाशः कस्मातृ गाढम् प्रसुप्तः ?

५. टिप्पणीं लिखत। (केवलं **व्दे**)

A. (i) सूर्यप्रभवो वंशः। १०
(ii) वागर्थाविव संपृक्तौ।

B. (i) नलः। १०
(ii) हंसः।

C. (i) शुध्दाः वर्णाः। १०
(ii) मिश्रवर्णाः।

D. (i) मधुमुरनरकविनाशन। १०
(ii) समरशमितदशकष्ठ।

---------------